International Journal of Sanskrit Research 2019; 5(2): 35-37

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(2): 35-37
© 2019 IJSR
www.anantaajournal.com
Received: 13-01-2019
Accepted: 17-02-2019

**यशोधन किसनमहाराज साखरे**
शोधछात्र, कविकुलगुरु कालिदास विश्वविद्यालय रामटेक नागपूर

Correspondence
**यशोधन किसनमहाराज साखरे**
शोधछात्र, कविकुलगुरु कालिदास विश्वविद्यालय रामटेक नागपूर

# वारकरीसंप्रदायः

**यशोधन किसनमहाराज साखरे**

**प्रस्तावना**

महाराष्ट्रे नैकाः सतां संप्रदायाः। यत्र सम्यक्तया अविच्छिन्नपरं परया ज्ञानं समाम्यते सः संप्रदायः। रामदासी संप्रदायः मुख्यतः श्रीरामभक्तिनिवेदकः। एतस्य संप्रदायस्य वेदेषु अतीवश्रद्धा। अस्य संप्रदायस्य दार्शनिक-भूमिका अद्वैत-वेदान्तस्य एव। महानुभाव संप्रदायः श्रीकृष्णभक्तिप्रधानः। तेन द्वैततत्त्वज्ञानस्य् अङ्गीकृतम् इति दृश्यते । एवः संप्रदायः वेदप्रानाण्यं न स्वीकरोनि। दत्तसंप्रदायः नाम ब्रह्मा-विष्णु-महेशानां समन्वयेन साकारितस्य श्रीदत्त महाराजस्य उपासकः संप्रदायः । एषः संप्रदायः अद्वेतवेदान्तं मन्यमानः सन् वैदिकः अपि। नाथसंप्रदायः आदिनाथात् आरब्धः। अस्मिन् संप्रदाये योगाभ्यासाय महत्त्व प्रदत्तम्।

वारकरीसंप्रदायः दार्शनिकदृष्ट्या अद्वैतवेदान्तगामी अपिच वेदप्रामाण्यवादी प्रथमतः तु को नाम वारकरी इति ज्ञातव्यम् । वारी नाम आवागमनम् । तस्मात् वारकरी नाम येन प्रतिवर्षं श्री पाण्डुरङ्गस्य यात्रायाः व्रतं घृतम् सः वारीकारः अर्थात् वारकरी इति उच्यते । एवा वारी नाम ईशसेवायाः व्रतम् एव । एषः तु भक्ति-संप्रदायः । एषः अद्वैततत्त्वज्ञानस्य बलवति अधिष्ठाने आधृतः अतिसुलभः उपासनापंथः । एषः देहतादात्म्यब्रह्मत्वं अनुगच्छन. भक्तिपंथा।

वारकरीजनस्य कनिचित् बहिरंग-लक्षणानि अपि च कानिचित् अंतरंगलक्षणानि सन्ति । प्रथमतःतु तस्मिन् व्रते स्वीकृते सति कण्ठे श्रीविष्णवे प्रिया पवित्रा तुलसीमाला धारितव्या इति एकं प्रमुखं बहिरंग लक्षणम् । व्यवहारे अथवा लौकिकार्ये गृहस्य उपरि तुलसीपत्र निवेशनम् इति वाक्यप्रचारः रूढः । गृहसंबंधितायाः स्वसत्तायाः परित्यागः इति अस्य अर्थः । स्वामिन्वपरित्यागम् इव तुलसीमालाधारणं नाम देहे तुलसीपत्रनिवेशः अर्थात् देहात्मत्वभ्रांतेः परित्यागः । तस्य देहान्तकृभ्रान्तेः परित्यागस्य प्रतीकं एषा तुलसीमाला । तुलसीमाला वारकरी संप्रदायस्य उपास्यदैवसताय श्री विठ्ठलाय अतिप्रिया।

अपिच एषः देहः नं तु भोगाय परं ईशसेवायै एव इति भावना सर्वदा चित्ते वसेत् इति अस्य सा प्रतीकम् । श्री तुकाराम महाराजः निवेदयति यत् एते वारकरीजनाः भाले गोपीचंदन तिलकं कुर्वन्ति; कष्ठे तुलसीमालां धारयन्ति; टाळमृदंगानां लयबद्धे निनादे हरिनाम्नः सततं घोषं कुर्वान्ति, सः निरूपमः सुखोत्सवः ।

एवं च कण्ठे तुलसीमालां परिधाय, ललाटे गोपीचन्दन तिलकं कृत्वा स्कन्धे नारंगध्वजाधृत्वा टाळमृदंगानां निनादे हरिनामोच्चारणं कुर्वन्तः प्रतिमासस्य शुद्धकादशीतिथौ किम् उत स्तोकांशेन आषाढाकार्तिकयोः मासयोः शुद्धैकादशीतिथौ । यः प्रतिवर्षं नियमेन श्रीविठ्ठलस्य दर्शनाय पंढरीं याति (यतः आषाढ कार्तिकयोः एकादशीतिथी महत्त्वपूर्ण प्रमुखे वा सन्ति ।) सः वारकरी इति उच्यते श्री ज्ञानेश्वर महाराजेन अपि एके स्थाने वारकरीजनस्य अंतरंग बहिरंगलक्षणानि प्रतिपादिनानि । कण्ठे तुलसीमाला धारयन्तः ललाटे गोपीचन्दन तिलकं कुर्वन्तः, शांति क्षमक्षिभि दैवीसम्पद्धिः सम्पन्नाः, वैराग्यवन्तः, कामक्रोधादिषड्रिपुरहिताः श्रीविठ्ठलस्य प्रियाः भक्ताः नाम वारकरीजनाः । वारकरीजनस्य अंतरंग-लक्षणं कथयन् श्री ज्ञानेश्वर महाराजः निवेदयति-येन स्वशरीरं वाणी मनः किम् उत जीवः अपि श्रीविठ्ठलाय समर्प्यते अर्थात् तान् (शरीर-वाणी-मनांसि) विठ्ठलसेवायै संयोजयति सः पंढरीनगर्याः वारीकरः नाम वारकरीजनः। पंढरपूरस्य प्रथमः ज्ञातः वारकरीजनः श्रीमद् आद्यशंकराचार्यः । एतत् वयं तस्य पाण्डुरङ्गाष्टकात् जाने वारकरी संप्रदाये नैकाःसन्तः अभवन् । श्रीनाथ महाराजस्य पितामहः श्री भानुदास महाराजः, श्री सोपानकाका, संत श्रीमुक्ताई, संत नामदेव महाराजः, संत गोरोबाकाका, संत नरहरी सोनारः, संत चोखामेळा, संत सोयराबाई, संत सावतामाळी, संत एकनाथ महाराजः, संत तुकराम महाराजः, संतनिळोबा महाराजः इत्यादिनां सतां वारकरी संप्रदायस्थ संतपरंपरायां समावेशः भवन्ति। संत बहिणाबाई इति कवयित्र्याः एके अभंगे वारकरी संप्रदाये समाविष्टांना सतां निर्देशः दृश्यते । अस्मिन् अभंगे महाराष्ट्रस्य वारकरी संप्रदायस्य वर्णनम् मंदीररूवेण कृतम् । श्रीज्ञानेश्वरमहाराजेन एतस्य संप्रदायस्य आधारशिला स्थापित । यद्यपि ज्ञानेश्वर महाराजक्य पूर्वमपि वारकरी संप्रदायस्य अस्तित्वम् आसीत् परं तेन संप्रदायाय तत्त्वज्ञानस्य, साहित्यस्य च आधारः दत्तः । अतएव श्री ज्ञानेश्वर महाराजेन वारकरी संप्रदायस्य आधारशिला स्थापिता इति उच्यते । श्री नामदेवरायः श्री ज्ञानेश्वर महाराजस्य अनुयायी आसीत् । अपि च तेन एतस्य वारकरी संप्रदायरूपस्य मंदीरस्य प्राङ्गणस्य निर्माणं कृतम् । नाम अस्य संप्रदायस्य तीर्थाटनेन पंजाब प्रांतपर्यंत विस्तारः कृतः । श्री एकनाथ महाराजेः तस्य विस्तृतसाहित्येन अस्य वारकरी संप्रदाय मंदिराय स्तन्भीभूव अंतिमतः जगत्गुरुणा तुकोबारायेण एतत् मंदिरं पूर्णीकृतम् । सः संप्रदाय मंदिरस्य कलशस्थाने विराजितः ।

सन्तः समाजस्य आवश्यकता । समाजे निष्कपटमूलं सौहार्दं निर्मितुं, संचलितुं च सतां अपि च तेषां वाङ्मयस्य अतीवावश्यकता भवति । सतां वाङमयस्य नैकानि मुखानि । अस्मिन् वाङ्मये भाषिकं काव्यात्मकं साहित्यिकालमाशत्मकं च सौन्दर्यम् विलसति । किं पुनः परतत्त्वस्पर्शेण वाङ्मयं श्रेष्ठीमूतम् । एतम् परस्पर्शं अनुभवतुं अंतःकरणस्य विशेषयोग्यता अत्यावश्यका । अस्य वाङ्मयस्य गूढार्थः केवलं काव्यस्य वा भाषायाः माध्यमेन ज्ञातुं न शक्यते । तस्य वास्तविकं रूपं समाधिमान्तुं तत्त्वज्ञानस्य पार्श्वभूमिः लक्षितव्या । ज्ञापिते तत्त्वज्ञाने सति अपि च तत्त्वज्ञानव्यवहारयोः सम्यक्-संतुलित-सुमधुर-समन्वये ज्ञाते सति आत्मौपम्यबुद्धेः निर्माणं भवन् अपिन सत्त्वगुणसंवर्धनेन समाजे सात्त्विक शांतिः समाधानं च अधिक ईदृशं रम्यं सात्त्विकं समाधानं समाजे सर्वे आप्तुयुः इति सकलसतामावलिचरणेषु महम् प्रार्थये ।

## संदर्भ ग्रंथ सूची

1. जगद्गुरु श्री तुकोबारायांची अभंग गाथा, संपादक साखरे किसनमहाराज यशोधन प्रकाशन,आळंदी 2008
2. जगद्गुरु श्री तुकाराम महाराजांची सार्थ अभंग गाथा भाग 1, साखरे किसनमहाराज,यशोधन प्रकाशन,आळंदी 2010
3. दशोपनिषद् भाव प्रकाशिका, साखरे किसनमहाराज यशोधन प्रकाशन,आळंदी 2008
4. दासबोध,गीताप्रेस,गोरखपूर,2010
5. **जगद्गुरु श्री तुकाराम महाराजांची सार्थ अभंग गाथा भाग 1, साखरे किसनमहाराज, यशोधन प्रकाशन, आळंदी 2010**
6. **दशोपनिषद् भाव प्रकाशिका, साखरे किसनमहाराज, यशोधन प्रकाशन, आळंदी 2008**
7. **दासबोध, गीताप्रेस, गोरखपूर, 2010**